श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीविहगेन्द्रसंहितान्तर्गतं

# ॥ श्रीसुदर्शन कवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसुदर्शन कवचम् ॥

अस्य श्रीसुदर्शनकवचमहामन्त्रस्य भगवानन्तर्यामी नारायण ऋषिः।
अनुष्टुप् छन्दः।
श्रीसुदर्शनरूपी श्रीमन्नारायणो देवता।
रं बीजम्।
हुं शक्तिः।
फट् कीलकम्।
श्रीसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः।

शङ्खं चक्रं गदा पद्मं मुसलं खड्गमेव च।
धेनुञ्च यमपाशञ्च मुद्रा ह्येताः प्रकीर्तिताः॥

पाञ्चजन्याय शङ्खाधिपतये नमः।
सुदर्शनाय हेतिराजाय नमः।
कौमोदक्यै गदाधिपतये नमः।
पं पद्माय नमः।
मुं मुसलाय नमः।
नं नन्दकाय
खड्गाधिपतये नमः।
सुं सुरभ्यैः नमः।
यं यमपाशाय नमः।

## ध्यानम्

शङ्खं शार्ङ्गं सखेटं हलपरशुगदाकुन्तपाशान्दधानम्
त्वन्यैर्वामैश्च चक्रेष्वसि मुसललसद्वज्र शूलाङ्कुशाग्नीन्।
ज्वालाकेशं किरीटं ज्वलदनलनिभं वह्निमुग्रस्थपीठम्
प्रत्यालीढं त्रिनेत्रं रिपुगणदमनं भावये चक्रराजम्॥

मस्तकं मे सहस्रारः फालं पातु सुदर्शनः।
भ्रुवौ मे चक्रराट् पातु नेत्रे द्वेऽर्केन्दुलोचनः॥ 1॥

कर्णौ वेदैस्स्तुतः पातु पातु घ्राणं विभीषणः।
महादीप्तः कपोलौ मे ओष्ठं रुद्रवरप्रदः॥ 2॥

दन्तान् पातु जगद्वन्द्यो रसनां मम सर्वदा।
सर्वविद्यार्णवः पातु गिरिं वागीश्वरो मम॥ 3॥

वीरसिंहो मुखं पातु चिबुकं भक्तवत्सलः।
सर्वदा पातु मे कण्ठं मेघगम्भीरनिस्स्वनः॥ 4॥

मम स्कन्धयुगं पातु धराभारापहारकः।
बाणासुरभुजारण्यदावाग्निः पातु मे भुजौ॥ 5॥

कालनेमिशिरश्छेत्ता पातु मे कूर्परद्वयम्।
करौ दिव्यायुधः पातु नखान्वज्रनखोपमः॥ 6॥

कक्षौ पातु महाशूरः स्तनौ शत्रुनिषूदनः।
पातु मे हृदयं भक्तजनानन्दश्च सर्वदा॥ 7॥

सर्वशास्त्रार्थसद्भूतिहेतुः पातूदरं मम।
वक्षः पातु महाधारो दिवि दानवमर्दनः॥ 8॥

पार्श्वौ मे पातु दीनार्तः शरणागतवत्सलः।
सर्वदा पृष्ठदेशं मे देवानामभयप्रदः॥ **9** ॥

नाभिं षट्कोणधामा मे पातु घण्टारवः कटिम्।
आदिमूलः पुमान्पातु गुह्यदेशं निरन्तरम्॥ **10** ॥

ऊरू पातु महाशूरो जानुनी भीमविक्रमः।
जङ्घे पातु महावेगो गुल्फे पातु महाबलः॥ **11** ॥

पादौ पातु सदा श्रीदो ब्रह्माद्यैरभिवन्दितः।
पातु पादतलद्वन्द्वं विश्वभारो निरन्तरम्॥ **12** ॥

सुदर्शननृसिंहो मे शरीरं पातु सर्वदा।
मम सर्वाङ्गरोमाणि ज्वालाकेशस्स रक्षतु॥ **13** ॥

अन्तर्बहिश्च मे पातु विश्वात्मा विश्वतोमुखः॥
रक्षाहीनञ्च यत्स्थानं प्रचण्डस्तत्र रक्षतु॥ **14** ॥

सर्वतो दिक्षु मे पातु ज्वालाशतपरिवृतः।
त्रिनेमिः पातु मत्प्राणान् भ्रातॄन्पात्वनलद्युतिः॥ **15** ॥

भार्यां लक्ष्मीसखः पातु पुत्रान्पातु सुदर्शनः।
श्रीकरो मे श्रियः पातु बन्धून्पातु बलाधिकः॥ **16** ॥

गोपांश्चैव पशून् पातु सहस्रारधरः सदा।
क्षेत्रं विश्वंभरः पातु मित्रं पात्वघनाशनः॥ **17** ॥

दिवारात्रौ च मां पातु अहिर्बुध्न्यवरप्रदः।
षोडशोत्तुङ्ग बाहुस्तु पातु मे राजसम्मुखम्॥ **18** ॥

वैरिविद्वेषसङ्घे तु सङ्ग्रामे शत्रुसूदनः।
अवान्तरा अबाधाश्च त्रासयेत्सर्वकालिकम्॥ **19** ॥

आधिव्याधि महाव्याधि मध्यतोपद्रवेऽपि च।
अपमृत्युमहामृत्यू नाशयेच्चक्रनायकः॥ **20**॥

परप्रयुक्तमन्त्रांश्च यन्त्रतन्त्रविभञ्जनः।
सुदर्शनोऽयमस्माकं दुर्दशादुःखनाशनः॥ **21**॥

सर्वसम्पत्प्रदाता मां चक्रराजो निरन्तरम्।
जपं पातु जगद्वन्द्यो मानसामक्षयप्रदः॥ **22**॥

प्रमादांश्चास्त्रधामासौ ज्ञानं रक्षतु सर्वदा।
अणिमादिमहैश्वर्यं पातु साम्राज्यसिद्धिदः॥ **23**॥

तिर्यग्ज्वालाग्निरूपश्च नष्टराज्यार्थदो मम।
राज्यं पातु सहस्रारः पदातिं पातु वाच्युतः॥ **24**॥

चतुरङ्ग बलस्तोमं रक्ष त्वञ्चक्रभावनः।
ज्योतिर्मयश्चक्रराजः सर्वान्वरुणरक्षकः॥ **25**॥

अखण्डमण्डितः पातु परचक्रापहारकः।
त्रिविक्रमश्चक्रराजः पातु धैर्यं सदा मम॥ **26**॥

नभोदशदिशव्याप्ति कीर्तिं पातु सुदर्शनः।
आयुर्बलं धृतिं पातु लोकत्रयभयापहः॥ **27**॥

सुधामण्डलसंविष्टो मायापञ्चसुशीतलः।
राजद्वारे सभामध्ये पातु मां चण्डविक्रमः॥ **28**॥

पूर्वे सुदर्शनः पातु आग्नेये पातु चक्रराट्।
याम्ये रथाङ्गकः पातु त्रिनेमिः पातु नैर्ऋते॥ **29**॥

लोकत्रय प्रभाकार ज्वालो रक्षतु पश्चिमे।
षट्कोणः पातु वायव्ये ह्यस्त्रराजोत्तरां दिशम्॥ **30**॥

ऐशान्यां चक्रराट् पातु मध्ये भूचक्रचक्रिणः।
अनन्तादित्यसङ्काशः क्ष्मान्तरिक्षौ च पातु मे॥ **31** ॥

सर्वतो दिक्षु मे पातु ज्वालासाहस्रसंवृतः।
एवं सर्वत्र संरक्ष सर्वदा सर्वरूपवान्॥ **32** ॥

सकारः पृथिवी ज्ञेयो हकारो अप उच्यते।
स्राकारो वायुरुक्तश्च रकारोऽम्बर उच्यते॥ **33** ॥

हुंकारमग्निरित्याहुः फट्कारं सूर्यरूपकम्।
स्वाहाकारं न्यसेन्मूर्ध्नि पीतरक्तसुवर्णकम्॥ **34** ॥

सकारं नासिकायान्तु हकारं वदने न्यसेत्।
स्राकारं हृदये चैव सृष्टिसंहारकारणम्॥ **35** ॥

रकारं विन्यसेद् गुह्ये हुंकारं जानुदेशके।
फकारं गुल्फदेशे तु टकारं पादयोर्न्यसेत्॥ **36** ॥

सर्वाणि चैव वर्णानि जप्यान्यङ्गुलिपर्वसु।
क्षिप्रं सौदर्शनञ्चक्रं ज्वालामालातिभीषणम्॥ **37** ॥

सर्वदैत्यप्रशमनं कुरु देववराच्युत।
सुदर्शन महाज्वाल छिन्धि छिन्धि सुवेदनाम्॥ **38** ॥

परयन्त्रञ्च तन्त्रञ्च छिन्धि मन्त्रौषधादिकम्।
सुदर्शन महाचक्र गोविन्दस्य करायुध॥ **39** ॥

सूक्ष्माधार महावेग छिन्धि छिन्धि सुभैरवम्।
छिन्धि पातञ्च लूतञ्च छिन्धि घोरं महद्विषम्॥ **40** ॥

इति सौदर्शनं दिव्यं कवचं सर्वकामदम्।
सर्वबाधाप्रशमनं सर्वव्याधिविनाशनम्॥ **41** ॥

सर्वशत्रुक्षयकरं सर्वमङ्गळदायकम्।
त्रिसन्ध्यं विजयं नृणां सर्वदा विजयप्रदम्॥ **42**॥

सर्वपाप प्रशमनं भोगमोक्षैकसाधनम्।
प्रातरुत्थाय यो भक्त्या पठेदेतत्सदा नरः॥ **43**॥

तस्य सर्वेषु कालेषु विघ्नः क्वापि न जायते।
यक्षराक्षसवेताळ भैरवाश्च विनायकाः॥ **44**॥

शाकिनी डाकिनी ज्येष्ठा निद्राबालग्रहादयः।
भूतप्रेतपिशाचाद्या अन्ये दुष्टग्रहा अपि॥ **45**॥

कवचस्यास्य जप्तारं दृष्टमात्रेण तेऽखिलाः।
पलायन्ते यथा नागाः पक्षिराजस्य दर्शनात्॥ **46**॥

अस्यायुतं पुरश्चर्यं दशांशं तिलतर्पणम्।
हवनं तर्पणञ्चैव तर्पणं गन्धवारिणा॥ **47**॥

पुष्पाञ्जलिर्दशांशं च मिष्टान्नं सघृतप्लुतम्।
चतुर्विंशद्द्विजान्भोज्य ततः कार्याणि साधयेत्॥ **48**॥

विन्यस्याङ्गेष्विदन् धीरो युद्धार्थं योऽभिगच्छति।
रणे जित्वाखिलाञ्छत्रून् विजयी भवति ध्रुवम्॥ **49**॥

मन्त्रिताम्बु त्रिवारं वा पिबेत्सप्तदिनावधिः।
व्याधयः प्रविनश्यन्ति सकलाः कुक्षिसंभवाः॥ **50**॥

मुखप्रक्षालने नेत्र नासिका रोगनाशनम्।
भीतानामभिषेकञ्च महाभयनिवारणम्॥ **51**॥

सप्ताभिमन्त्रितानेन तुलसीमूलमृत्तिका।
लेपान्नश्यन्ति ते रोगाः सद्यःकुष्ठादयोऽखिलाः॥ **52**॥

ललाटे तिलकं स्त्रीणां मोहनं सर्ववश्यकृत्।
परेषां मन्त्रयन्त्राणि तन्त्राण्यपि विनाशकृत्॥ **53**॥

व्यालसर्पादि सर्वेषां विषापहरणं परम्।
सौवर्णे राजते वापि भूर्जे ताम्रादिकेऽपि वा॥ **54**॥

लिखित्वा त्वर्चयेद्भक्त्या सः श्रीमान्भवति ध्रुवम्।
बहुना किमिहोक्तेन यद्यद्वाञ्छति यो नरः॥
सकलं प्राप्नुयादस्य कवचस्य प्रसादतः॥ **55**॥

॥ इति श्रीसुदर्शनकवचं समाप्तम्॥